# শ্রীগণেশস্তবরাজঃ

{॥ শ্রীগণেশস্তবরাজঃ ॥}

শ্রীগণেশায নমঃ । শ্রীভগবানুবাচ ।

গণেশস্য স্তবং বক্ষ্যে কলৌ ঝটিতি সিদ্ধিদম্ ।

ন ন্যাসো ন চ সংস্কারো ন হোমো ন চ তর্পণম্ ॥ ১॥

ন মার্জনং চ পঞ্চাশৎসহস্রজপমাত্রতঃ ।

সিদ্ধ্যত্যর্চনতঃ পঞ্চশত-ব্রাহ্মণভোজনাত্ ॥ ২॥

অস্য শ্রীগণেশস্তবরাজমন্ত্রস্য ভগবান্ সদাশিব ঋষিঃ,

অনুষ্টুপ্ ছন্দঃ, শ্রীমহাগণপতির্দেবতা,

শ্রীমহাগণপতিপ্রীত্যর্থে জপে বিনিযোগঃ ।

বিনাযকৈক-ভাবনা-সমর্চনা-সমর্পিতং

প্রমোদকৈঃ প্রমোদকৈঃ প্রমোদ-মোদ-মোদকম্ ।

যদর্পিতং সদর্পিতং নবান্নধান্যনির্মিতং

ন কণ্ডিতং ন খণ্ডিতং ন খণ্ডমণ্ডনং কৃতম্ ॥ ১॥

সজাতিকৃদ্-বিজাতিকৃত-স্বনিষ্ঠভেদবর্জিতং

নিরঞ্জনং চ নির্গুণং নিরাকৃতিং হ্যনিষ্ক্রিযম্

সদাত্মকং চিদাত্মকং সুখাত্মকং পরং পদং

ভজামি তং গজাননং স্বমাযযাত্তবিগ্রহম্ ॥২।

গণাধিপ! ত্বমষ্টমূর্তিরীশসূনুরীশ্বর-

স্ত্বমম্বরং চ শম্বরং ধনঞ্জয়ঃ প্রভঞ্জনঃ ।

ত্বমেবং দীক্ষিতঃ ক্ষিতির্নিশাকরঃ প্রভাকর-

শ্চরাঽচর-প্রচার-হেতুরন্তরায-শান্তিকৃত্ ॥ ৩॥

অনেকদং তমাল-নীলমেকদন্ত-সুন্দরং

গজাননং নমোঽগজাননাঽমৃতাব্ধি-চন্দিরম্ ।

সমস্ত-বেদবাদসৎকলা-কলাপ-মন্দিরং

মহান্তরায-কৃত্তমোঽর্কমাশ্রিতোঽন্দরূং পরম্ ॥ ৪॥

সরত্নহেম-ঘণ্টিকা-নিনাদ-নুপুরস্বনৈ-

মৃদঙ্গ-তালনাদ-ভেদসাধনানুরূপতঃ ।

ধিমি-দ্ধিমি-ত্তথোংগ-থোঙ্গ-থৈযি-থৈযিশব্দতো

বিনাযকঃ শশাঙ্কশেখরঃ প্রহৃষ্য নৃত্যতি ॥ ৫॥

সদা নমামি নাযকৈকনাযকং বিনাযকং

কলাকলাপ-কল্পনা-নিদানমাদিপরূষম্ ।

গণেশ্বরং গুণেশ্বরং মহেশ্বরাত্মসম্ভবং

স্বপাদপদ্ম-সেবিনা-মপার-বৈভবপ্রদম্ ॥ ৬॥

ভজে প্রচণ্ড-তুন্দিলং সদন্দশূকভূষণং

সনন্দনাদি-বন্দিতং সমস্ত-সিদ্ধসেবিতম্ ।

***Stotram Digitalized By [Sanskritdocuments.org](https://sanskritdocuments.org)***

সুরাঽসুরৌঘযোঃ সদা জযপ্রদং ভযপ্রদং
সমস্তবিঘ্ন-ঘাতিনং স্বভক্ত-পক্ষপাতিনম্ ॥ ৭॥

করাম্বুজাত-কঙ্কণঃ পদাব্জ-কিঙ্কিণোগণো
গণেশ্বরো গুণার্ণবঃ ফণীশ্বরাঙ্গভূষণঃ ।
জগত্রযান্তরায-শান্তিকারকোঽস্তু তারকো
ভবার্ণবস্থ-ঘোরদুর্গহা চিদেকবিগ্রহঃ ॥ ৮॥

যো ভক্তিপ্রবণশ্চরা-ঽচর-গুরোঃ স্তোত্রং গণেশাষ্টকং
শুদ্ধঃ সংযতচেতসা যদি পঠেন্নিত্যং ত্রিসন্ধ্যং পুমান্ ।
তস্য শ্রীরতুলা স্বসিদ্ধি-সহিতা শ্রীশারদা সর্বদা
স্যাতাং তৎপরিচারিকে কিল তদা কাঃ কামনানাং কথাঃ ॥ ৯॥

॥ ইতি শ্রীরুদ্রযামলোক্তো গণেশস্তবরাজঃ সম্পূর্ণঃ ॥

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

% File name : gaNeshastavarAja.itx
% Category : stavarAja
% Location : doc_ganesha
% Language : Sanskrit
% Subject : hinduism/religion
% Transliterated by : Available at webdunia.com
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : source rudrayAmala tantra
% Latest update : April 23, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website